# प्रश्न बैंक

# 2021—22

# विषयः संस्कृत

## कक्षा : 10वीं

GENIUS MIND
Date
Page

# कक्षा - 10

## इकाई - 1

प्रत्यय , विशेषणम् / विशेष्य उचितं विकल्पं चित्वा लिखत ।

1. गच्छन् इति पदे कः प्रत्ययः अस्ति ?
(i) तुमुन् (ii) शतृ (iii) शानच् (iv) क्त

2. पठनीयः इत्यस्मिन् पदे प्रत्ययः अस्ति ।
(i) क्त्वा (ii) क्त (iii) शतृ (iv) अनीयर्

3. विहाय इत्यस्मिन पदे प्रत्ययः अस्ति
(i) वि + हा + क्तिन (ii) वि + हा + क्त (iii) वि + हा + ल्यप (iv) वि + हा + शतृ

4. हन् धातोः क्तः प्रत्यय सम्योज्य रूपं अस्ति
(i) हन्तः (ii) हतः (iii) हंतः (iv) हम्तः

5. क्री + तुमुन् सम्योज्य रूपं अस्ति
(i) क्रेतुम् (ii) कतुमि (iii) क्रीतुम् (iv) क्रतुम्

6. गन्तुम् इत्यस्मिन् पदे प्रत्ययः अस्ति
(i) अनीयर् (ii) क्तवतु (iii) शानच् (iv) तुमुन्

7. सेव् धातोः शानच् प्रत्यय सम्योज्य रूपं अस्ति
(i) सेवायमान् (ii) सेवा (iii) सेवायमानः (iv) सेवमानः

8. भू धातोः क्तः प्रत्यय सम्योज्य रूपं भवति
(i) भूत्वा (ii) भूतः (iii) भूयः (iv) भूती

9. कर्तव्यम् इत्यस्मिन पदे प्रत्ययः अस्ति
(i) शानच् (ii) शतृ (iii) तव्यत् (iv) मतुप

10. ज्ञेयः इत्यस्मिन् पदे प्रत्ययः अस्ति ।
(i) ण्यत् (ii) क्यप (iii) यत् (iv) क्त

(ii) कश्चित् कृषकः क्षेत्रकर्षणं कुर्वन्नासीत् अस्मिन वाक्ये विशेषण पदं किम् ?
(i) कश्चित् (ii) कृषकः (iii) आसीत् (iv) क्षेत्रकर्षणं

12. कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत् अस्मिन् वाक्ये विशेषण पदं किं?
(i) कृषकः (ii) दुर्बलं (iii) वृषभं (घ) तोदनेन

13. कृष्णः धेनुः दुग्धं न ददाति अस्मिन् वाक्ये विशेषण पदं किम् ?
(i) धेनुः (ii) ददाति (iii) दुग्धं (iv) कृष्णः

14. भार्या बुद्धिमती आसीत् अस्मिन् वाक्ये विशेषण पदम् किम् ?
(i) बुद्धिमती (ii) भार्या (iii) आसीत् (iv) वसति

15. व्यायामेन् शरीरं पुष्टं भवति अस्मिन् वाक्ये विशेषण पदं किम् ?
(i) शरीरं (ii) पुष्टं (iii) कलहं (iv) कोऽपि न

16. हरिश्चन्द्रः राजा सत्यवादी आसीत् इत्यस्मिन वाक्ये विशेष्य पदं किम् ?
(i) राजा (ii) हरिश्चन्द्रः (iii) सत्यवादी (iv) आसीत्

GENIUS MIND
Date
Page

17- सन्यासी गृहत्यागी भवति इत्यस्मिन् वाक्ये विशेष्य पदं किम् ?
(i) गृहत्यागी (ii) भवति (iii) सन्यासी (iv) कोऽपि न
18- राजसिंहः पार्श्वे बुद्धिमान मंत्री आसीत् अस्मिन् वाक्ये विशेष्य पदं किं ?
(i) राजसिंहः (ii) मन्त्री (iii) बुद्धिमान (iv) पार्श्वे
19- रामः सर्वेषु राजेषु उत्तमः आसीत् इत्यस्मिन् वाक्ये विशेष्य पदं किं ?
(i) सर्वेषु (ii) राजेषु (iii) रामः (iv) उत्तमः
२०- पलायमानम् श्वानम् अस्मिन् पदे विशेष्य पदं किम् ?
(i) श्वानम् (ii) अस्मिन् (iii) पलायमानम् (iv) कोऽपिनास्ति

आदर्श उत्तर -

(1) (ii) शतृ (२) (iv) अनीयर (3) (iii) वि + हा + ल्यप (4) (ii) हतः
(5) (ii) क्तुमि (6) (iv) तुमुन् (7) (iv) सेवमानः (8) (ii) भूतः
(9) (iii) कर्तव्यम् (10) (iii) यत् (11) (i) कश्चित् (12) (ii) दुर्वलं
(13) (iv) कृष्णः (14) (i) बुद्धिमती (15) (ii) पुष्पं (16) (i) राज्ञः
(17) (iii) सन्यासी (18) (ii) मन्त्री (19) (iii) रामः (२०) (i) श्वानम्

इकाई - २

1- रिक्तस्थानानी पूरयत -

1- सलिलं इत्यस्य पर्याय पदं - - - । (नीरं / शरीरं)
2- पवनः इत्यस्य पर्याय पदं - - - । (वायुः / तड़ागं)
3- भार्या इत्यस्य पर्याय पदं - - - । (भगिनी / कान्ता)
4- आम्रम् इत्यस्य पर्याय पदं - - - । (रसालं / फलम्)
5- वनम् इत्यस्य पर्याय पदं - - - । (आननम् / काननम्)
6- अग्निः इत्यस्य पर्याय पदं - - - । (नीरजः / अनलः)
7- सविता इत्यस्य पर्याय पदं - - - । (मधुकरः / दिवाकरः)
8- गजः इत्यस्य पर्याय पदं - - - । (घोटकः / करी)
9- सुधियः इत्यस्य पर्याय पदं - - - । (अभिज्ञाः / वैज्ञानिकाः)
10- कमलम् इत्यस्य पर्याय पदं - - - । (पंकजम् / पुष्पम्)
11- सुकरम् शब्दस्य विलोम पदं - - - । (शुद्धम् / दुर्वहम्)
12- सान्ताः शब्दस्य विलोम पदं - - - । (भयान्ताः / अनन्ताः)
13- विमूढधी शब्दस्य विलोम पदं - - - । (निधिः / सुधीः)
14- अस्तमये शब्दस्य विलोम पदं - - - । (सायं / उदये)
15- प्रसीदति शब्दस्य विलोम पदं - - - । (प्रकुप्यति / नियुज्यति)
16- चौरः - - - - - आसीत् । (आरक्षी / विपक्षी)
17- कृषकायः - - - - आसीत् । (अभियुक्तः / न्यायुक्तः)
18- पिता पुत्राय बाल्ये - - - - यच्छति । (विद्यां / आभूषणं)
19- वाचि - - - - भवेत् । (वक्रता / अवक्रता)
20- - - - प्राणिनः भूकम्पेन निहन्यन्ते । (कृषकः / विवशाः)

आदर्श उत्तर -

(1) नीरं (2) वायुः (3) कान्ता (4) रसालं (5) काननम् (6) अनलः
(7) दिवाकरः (8) करी (9) अभिज्ञाः (10) पंकजम् (11) दुर्वहम् (12) अनन्ताः
(13) सुधीः (14) उदये (15) प्रकुप्यति (16) आरक्षी (17) अभियुक्तः (18) विद्यां
(19) वक्रता (20) विवशाः

Date
Page

## इकाई - 3

शब्दरूपाणि / उपसर्गः पदस्य युग्मं मेलयत -

| | |
|---|---|
| 1- फलानां | सप्तमी एकवचनम् |
| 2- राज्ञी | दुस् |
| 3- संचरते | आङ् (आ) |
| 4- दुष्कर्म | चतुर्थी विभक्ति |
| 5- संस्कृतम् | सम् |
| 6- अधिकार | पञ्चमी |
| 7- प्र + हरति | इदम् |
| 8- आजन्मः | सम् |
| 9- गृहात् | तृतीया एकवचनम् |
| 10- अस्मिन् | अधि |
| 11- काठिन्येन | प्रहरति |
| 12- धेनूनाम् | षष्ठी एकवचनम् |
| 13- द्वयोः | उत् |
| 14- बालकाय | प्रथमा द्विवचनम् |
| 15- उत्कर्ष | षष्ठी बहुवचनम् |

**आदर्श उत्तर -**

| | |
|---|---|
| 1- फलानां | षष्ठी बहुवचनम् |
| 2- राज्ञी | सप्तमी एकवचनम् |
| 3- संचरते | सम् |
| 4- दुष्कर्म | दुस् |
| 5- संस्कृतम् | सम् |
| 6- अधिकार | अधि |
| 7- प्र + हरति | प्रहरति |
| 8- आजन्मः | आङ् (आ) |
| 9- गृहात् | पञ्चमी |
| 10- अस्मिन् | इदम् |
| 11- काठिन्येन | तृतीया एकवचनम् |
| 12- धेनूनाम् | षष्ठी बहुवचनम् |
| 13- द्वयोः | प्रथमः द्वि वचनम् |
| 14- बालकाय | चतुर्थी |
| 15- उत्कर्ष | उत् |

GENIUS MIND
Date
Page

# इकाई -4

धातुरूपाणि / अव्ययः एकवाक्येन उत्तरत -

1- 'वद धातोः' लोट लकारस्य मध्यम पुरुष बहुवचनम् रूपं किम्?
2- 'अस् धातोः' लृट लकारस्य प्रथम पुरुष बहुवचनम् रूपं किम्?
3- 'लभ् धातोः' लट लकारस्य उत्तम पुरुष एकवचनं रूपं किम्?
4- 'हन् धातोः' लोट लकारस्य प्रथम पुरुष एकवचनं किम्?
5- 'गच्छति' क्रियापदे कः धातु अस्ति?
6- "गम् धातोः" लङ् लकारस्य प्रथम पुरुष द्विवचनं किम् अस्ति?
7- "मोहनः तिष्ठति" अस्मिन् वाक्ये कः धातुः?
8- "अहमपि आपणं गच्छामि" अस्मिन् वाक्ये अव्ययं किं अस्ति?
9- "विद्यामाता इव रक्षति" अस्मिन वाक्ये अव्यय पदं किं अस्ति?
10- "सदाचारः एव परमोधर्मः" अस्मिन वाक्ये अव्ययं किम् अस्ति?
11- "अचिरं गृहं गच्छ" अस्मिन वाक्ये अव्यय पदं किम् अस्ति?
12- "अथ रामायण कथा आरभ्यते" अस्मिन् वाक्ये अव्यय पदं किम् अस्ति?
13- "अहं श्वः मार्गं गमिष्यामि" अस्मिन् वाक्ये अव्यय पदं किम् अस्ति?
14- "तत्र शिवालयः अस्ति" एत अस्मिन् वाक्ये अव्यय पदं किम् अस्ति?
15- "वृथा कलहम् मा कुरु" अस्मिन् वाक्ये अव्यय पदं किम् अस्ति?

आदर्श उत्तर - 1- वदत
2. भविष्यन्ति
3- लभे
4- हन्तु
5- गम्
6- अगच्छताम्
7- स्था
8- अपि
9- इव
10- एव
11- अचिरं
12- अथ
13- श्वः
14- तत्र
15- वृथा, मा

GENIUS MIND
Date
Page

इकाई -5-

शुद्ध वाक्यानां समक्षे 'आम्' अशुद्ध वाक्यानां समक्षे 'न' लिखत ।

1- ग्रन्थालयो इति पदे गुण सन्धि अस्ति ।
2- भानूदयः इत्यस्मिन् पदे दीर्घ सन्धि अस्ति ।
3- हितोपदेश इत्यस्मिन् पदे यण सन्धि अस्ति ।
4- ममैव इत्यस्मिन् पदे वृद्धि सन्धि अस्ति ।
5- यदि + अपि पूर्ण के पदं यद्यपि अस्ति ।
6- सम् + चरणम् पूर्ण पदं संवरणम् अस्ति ।
7- अन्य + अपि अयादि संधि अस्ति ।
8- नयनम् इत्यस्मिन् पदे व्यञ्जन संधि अस्ति ।
9- अन्य पद प्रधानः तत्पुरुषः अस्ति ।
10- घनश्याम् इति पदे कर्मधारय समास अस्ति ।
11- यथा शक्ति इत्यस्मिन् पदे अव्ययीभाव समास वर्तते ।
12- वाचि पटुः समस्त पद वाकपटुः अस्ति ।
13- हरिततरुणाम् कर्मधारय समास अस्ति ।
14- महान् आत्मा एषाम् महात्मा अस्ति ।
15- संख्यापूर्वो द्विगु समास अस्ति ।

आदर्श उत्तर - 1- न
2- आम्
3- न
4- आम्
5- आम्
6- आम्
7- न
8- न
9- न
10- आम्
11- आम्
12- आम्
13- आम्
14- न
15 आम्

Date
Page

इकाई - 6 से !!

अधोलिखितेषु प्रश्नेषु उत्तराणि संस्कृतभाषायाम् लिखत ।

1- केषां माला रमणीया ?
2- कविः किमर्थम् प्रकृतेः शरणम् इच्छति ?
3- मनुष्याणां महान् रिपुः कः ?
4- बुद्धिमती केन उपेता पितुर्गृहं चलिता ?
5- कीदृशं कर्म व्यायामसंज्ञितम् कथ्यते ?
6- कृषकः किं करोति स्म ?
7- वस्तुतः चौरः कः आसीत् ?
8- कीदृशे प्रदेशे पदयात्रा न सुखावहा ?
9- निर्धनः जनः कथं वित्तं उपार्जितवान् ?
10- पिता पुत्राय बाल्ये किं यच्छति ?
11- प्राणेभ्योऽपि कः रक्षणीयः ?
12- कीदृशाः प्राणिनः भूकम्पेन निहन्यन्ते ?
13- अनिशं महानगरमध्ये किं प्रचलति ?
14- बुद्धिमती कुत्र व्याघ्रं ददर्श ?
15- कस्य मांसं स्थिरीभवति ?

आदर्श उत्तर —

1- हरिततरूणांललितलतानाम् ।
2- अत्र धरातले जीवितं दुर्वहं जातम् अतः कविः प्रकृतेः शरणम् इच्छति ।
3- मनुष्याणां महान् रिपुः आलस्यम् ।
4- बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।
5- शरीरायासजननं कर्म व्यायामसंज्ञितम् कथ्यते ।
6- कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं करोति स्म ।
7- वस्तुतः चौरः आरक्षी आसीत् ।
8- विजने प्रदेशे पदयात्रा न सुखावहा ।
9- निर्धनः जनः भूरि परिश्रम्य वित्तम् उपार्जितवान् ।
10- पिता पुत्राय बाल्ये विद्याधनं यच्छति ।
11- प्राणेभ्योऽपि सदाचारः रक्षणीयः ।
12- विवशाः प्राणिनः भूकम्पेन निहन्यते ।
13- अनिशं महानगरमध्ये कालायसचक्रम् प्रचलति ।
14- बुद्धिमती गहनकानने व्याघ्रं ददर्श ।
15- व्यायामनिरतस्य मांसं स्थिरीभवति ।

- इकाई - 12 -

अधोलिखितेषु वाच्य परिवर्तन कुरुत ।

1- गुणी गुणं जानाति (बहुवचने)
2- पशुः उदीरितम् अर्थं गृह्णाति (कर्मवाच्ये)
3- मृगाः मृगैः सह अनुव्रजन्ति (एकवचने)
4- कः छायां निवारयति (कर्मवाच्ये)
5- तेन एव वह्निना शरीरं दह्यते (कर्तृवाच्ये)
6- तेन फलानि खाद्यन्ते (कर्तृवाच्ये)
7- चौराः ग्रामे नियुक्ताः राजपुरुषाः आसन् (एकवचने)
8- आत्महितैषिभिः व्यायामः क्रियते (कर्तृवाच्यम्)
9- मोहनः पाठं पठति (कर्मवाच्ये)
10- लतया गीतं गीयते (कर्तृवाच्ये)

आदर्श उत्तर -

1- गुणिनः गुणं जानन्ति ।
2- पशुना उदीरितः अर्थः गृह्यते ।
3- मृगः मृगैः सह अनुव्रजति ।
4- केन छाया निवार्यते ।
5- सः एव वह्निः शरीरं दहते ।
6- सः फलम् खादति ।
7- चौरः ग्रामे नियुक्तः राजपुरुषः आसीत् ।
8- आत्महितैषिणः व्यायामं कुर्वन्ति ।
9- मोहनेन पाठः पठ्यते ।
10- लता गीतम् गायति ।

GENIUS MIND
Date
Page

## इकाई - 13

अधोलिखितेषु संवादेषु कः कं प्रति कथयति -

| | कः कथयति | कं प्रति कथ- |
|---|---|---|
| 1- वस्तुतः वनराजः भवितुं तु अहमेव योग्यः। | ---- | ---- |
| 2- अहम् वनराजः किं भयं न जायते। | ---- | ---- |
| 3- राजा तु रक्षकः भवति परं भवान् तु भक्षकः। | ---- | ---- |
| 4- तूष्णीं भव। कथं त्वं योग्यः वनराजपदाय ? | ---- | ---- |
| 5- वस्तुतः सर्वे वन्यजीविनः अन्योन्याश्रिताः। | ---- | ---- |
| 6- तस्य मृतशरीरं राजमार्गं निकषा वर्तते। | ---- | ---- |
| 7- निजकृत्यस्य फलं भुङ्क्ष्व। | ---- | ---- |
| 8- अरे। अरे। किं जल्पसि यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः। | ---- | ---- |
| 9- अरे। अरे। माम् विहाय कथमन्या राजा भवितुमर्हति। | ---- | ---- |
| 10- मम नृत्यं तु प्रकृतेः आराधना। | ---- | ---- |

<u>आदर्श उत्तर -</u>

| | कः कथयति | कम् प्रति |
|---|---|---|
| 1- | काकः | वानरः |
| 2- | सिंहः | वानरः |
| 3- | वानरः | सिंहः |
| 4- | मयूरः | वानरः |
| 5- | प्रकृतिमाता | सर्वप्राणिनः |
| 6- | कर्मचारी | न्यायाधीशः |
| 7- | आरक्षी | अभियुक्तः |
| 8- | काकः | पिकः |
| 9- | वकः | वानरः |
| 10- | मयूरः | काकः |

GENIUS MIND
Date
Page

## - इकाई -१४ -

स्थूलपदान्याधिकृत्य प्रश्ननिर्माणं कुरुत ।

1- <u>प्रकृत्याः</u> सन्निधौ वास्तविकं सुखं विद्यते।
2- <u>महानगरेषु</u> वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति ।
3- त्वं <u>मानुषात्</u> बिभेषि।
4- बुद्धिमती <u>चपेटया</u> पुत्रौ प्रहृतवती ।
5- व्यायामं कुर्वतः <u>विरुद्धं</u> भोजनम् अपि परिपच्यते।
6- <u>अरयः</u> व्यायामिनं न अर्दयन्ति ।
7- <u>धेनूनाम्</u> माता सुरभिः आसीत् ।
8- सः <u>कृच्छ्रेण</u> भारम् उद्वहति ।
9- मयूरस्य नृत्यं <u>प्रकृतेः</u> आराधना ।
10- सर्वे <u>प्रकृतिमातरं</u> प्रणमन्ति ।
11- <u>पुत्रं</u> द्रष्टुं सः प्रस्थितः ।
12- न्यायाधीशः <u>बंकिमचन्द्रः</u> आसीत् ।
13- <u>एतादृशी</u> भयावह घटना गढ़वाल क्षेत्रे घटिता ।
14- विवशाः प्राणिनः <u>आकाशे</u> पिपीलिकाः इव म्रियन्ते ।
15- <u>तत्वाधिस्य</u> निर्णयः विवेकेन कर्तुं शक्यः ।

<u>आदर्श उत्तर</u> - 1- कस्याः
2- केषु
3- कस्मात्
4- कया
5- कीदृशं
6- कः
7- केषाम्
8- केन
9- कस्याः
10- कां
11- कं
12- कः
13- कीदृशी
14- कुत्र
15- कस्य

GENIUS MIND
Date
Page

इकाई - 5

अशुद्धकारक संसोधानम् कुरुत ।

1- रामः पुस्तकं पठसि ।
2- गणेशं नमः ।
3- त्वम् भानुषात् बिभेमि ।
4- बालकाः विद्यालयं आगच्छति ।
5- मोहनः कलमस्य लिखति ।
6- लता गीतानि गीयते ।
7- सैनिकः अश्वेन पतति ।
8- खगाः वृक्षाय निवससि ।
9- गंङ्गा हिमालयं प्रवहति ।
10- मयूरः वने नृत्यान्ति ।

आदर्श उत्तर - 1- रामः पुस्तकं पठति ।
2- गणेशाय नमः ।
3- त्वम् भानुषात् बिभेषि ।
4- बालकाः विद्यालयात् आगच्छन्ति ।
5- मोहनः कमलेन लिखति ।
6- लता गीतं गायति ।
7- सैनिकः अश्वात् पतति ।
8- खगाः वृक्षेषु निवसन्ति
9- गंङ्गा हिमालयात् प्रवहति ।
10- मयूराः वने नृत्यन्ति ।

GENIUS MIND
Date
Page

## इकाई - 16

अधोलिखितेषु गद्यांशस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् लिखत।

1- अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसतिस्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद- "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो: द्वितीयः कश्चिल्लक्ष्यते।

प्रश्नाः-

(i) देउलाख्यो ग्रामः को वसतिस्म?

(ii) तस्य भार्या का आसीत्?

(iii) सा कं ददर्श?

आदर्श उत्तर - (i) राजसिंहः नाम राजपुत्रः वसतिस्म।

(ii) तस्य भार्या बुद्धिमती आसीत्।

(iii) सा एकं व्याघ्रं ददर्श।

2- कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्।

प्र०-क - कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ?

प्र०-ख - तयोः बलीवर्दयोः एकः कीदृशः आसीत् ?

प्र०-ग - मातुः सुरभेः नेत्राभ्याम् कानि आविरासन् ?

आदर्श उत्तर - (क) बलीवर्दाभ्याम् क्षेत्रकर्षणं कुर्वन्नासीत्।

(ख) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्। (ग) मातुः सुरभेः नेत्राभ्याम् अश्रूणि आविरासन्।

---

3- वनस्य दृश्यं समीपे एवैका नदी वहति। एकः सिंहः सुखेन विश्राम्यते। तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्माद् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति। एवमेव वानराः वारं-वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः, धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति।

प्र०-क - कः सुखेन विश्राम्यते ?

प्र०-ख - कः आगत्य सिंहस्य पुच्छं धुनाति ?

प्र०ग - क्रुद्धः सिंहः किं करोति ?

आदर्श उत्तर - (क) सिंहः सुखेन विश्राम्यते। (ख) वानरः आगत्य सिंहस्य पुच्छं धुनाति।

(ग) क्रुद्धः सिंहः इतस्ततः धावति गर्जति च।

---

4- विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परम् विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति।

प्र०-क - विचित्रा कः ?

प्र०ख - तस्मिन् गृहे कः प्रविष्टः ?

प्र०ग - चौरः काम् आदाय पलायितः ?

आदर्श उत्तर -

(क) विचित्रा दैवगतिः

(ख) तस्मिन् गृहे कश्चन चौरः प्रविष्टः।

(ग) चौरः तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।

P. P/14

GENIUS MIND
Date
Page

5- कश्चन् निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत् । एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स वसयानं विहाय पदातिरेव प्राचलत् ।

प्र०-क- कः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ?
प्र०-ख- तेन कथं कुत्र च स्वपुत्रं प्रवेशं दापयितुं सफलो जातः?
प्र०-ग- एकदा स पिता कथं व्याकुलो जातः?

आदर्श उत्तर- (क) निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ।
(ख) तेन स्वपुत्रं महाविद्यालये प्रवेशं दापयितुं सफलो जातः।
(ग) स्वतनुजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।

इकाई -17

1- अधोलिखितेषु पद्यांशस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत ।

1- व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम् ।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥

प्र०(क) कः सदा पथ्यः ?
प्र०-(ख) व्यायामो हि सदा कथं बलिनाम् ?
प्र०-(ग) स्निग्धभोजिनां कः सदा पथ्यः ?

आदर्श उत्तर- (क) व्यायामो हि सदा पथ्यः। (ख) व्यायामो हि सदा पथ्यो बलिनाम्।
(ग) स्निग्धभोजिनां व्यायामो हि सदा पथ्यः।

2- विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ॥

प्र०-क - कुत्र किञ्चिन्निरर्थकं नास्ति ?
प्र०-ख - विचित्रे खलु संसारे किं नास्ति ?
प्र०-ग - कः धावने वीरः अस्ति ?

आदर्श उत्तर- (क) विचित्रे खलु संसारे किञ्चिद् निरर्थकं नास्ति ।
(ख) विचित्रे खलु संसारे किञ्चिद् निरर्थकं नास्ति ।
(ग) अश्वः धावने वीरः अस्ति ।

3- गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः॥

प्र०-क - कः गुणं वेत्ति ?
प्र०-ख - बलं कः न वेत्ति ?
प्र०-ग - कः वसन्तस्य गुणं वेत्ति कः न वेत्ति ?

आदर्श उत्तरं-(क) गुणी गुणं वेत्ति। (ख) बलं निर्बलं न वेत्ति।
(ग) पिकः वसन्तस्य गुणं वेत्ति वायसः न वेत्ति।

---

4- आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

प्र०-क- कः प्रथमो धर्मः ?
प्र०-ख - आचारः प्रथमो धर्मः इत्येतद् केषां वचः ?
प्र०-ग - तस्माद् कं रक्षेत् ?

आदर्श उत्तर-(क) आचारः प्रथमो धर्मः। (ख) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
(ग) तस्माद् सदाचारं रक्षेत्।

---

5- आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

प्र०-क - आलस्यं हि केषां शरीरस्थो महान् रिपुः ?
प्र०-ख - कस्य समो ~~का~~ बन्धु नास्ति ?
प्र०-ग - किं मनुष्याणां शरीरस्थो महान रिपुः ?

आदर्श उत्तर - (क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
(ख) उद्यम समो बन्धुः नास्ति। (ग) आलस्यं हि मनुष्याणां शरीरस्थो महान रिपुः।

---

इकाई - 8

1- अधोलिखितेषु नाट्यांशस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत।

1- पिकः- अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते -
काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥

प्र०क - काकः कीदृशः पिकः कीदृशः ?
प्र०ख - कदा काकः काकः पिकः पिकः ?
प्र०-ग - 'श्रृण्वन' इत्यस्य शब्दस्य प्रकृति प्रत्ययं पृथक कुरुत।

आदर्श उत्तर- (क) काकः कृष्णः पिकः कृष्णः। (ख) वसन्त समये।
(ग) 'श्रु' धातुः शतृ प्रत्ययः।

P- P-16

GENIUS MIND
Date
Page

२- प्रकृतिमाता - अहं प्रकृतिः युष्माकं सर्वेषां जननी ? यूयं सर्वे एव मे प्रियाः। सर्वेषामेव महत्कृते महत्वं विद्यते यथासमयत न तावत कलहेन समयं वृथा यापयन्तु अपितु मिलित्वा एव मोदहवं जीवनं च सफलं कुरुध्वम् । तद्यथा कथितम् - प्रजा सुखे सुखं राज्ञः, प्रजानां तु प्रियं हितम्।।

प्र०-क - अहं प्रकृतिः केषां जननी ?

प्र० ख - राज्ञः सुखं कस्मिन् ?

प्र०-ग - 'युष्माकम्' इत्यस्य पदस्य मूलशब्दं विभक्तिं वचनञ्च लिखत।

आदर्श उत्तर - (क) युष्माकं सर्वेषां जननी। (ख) राज्ञः सुखम् प्रजा सुखे।
(ग) युष्मद् शब्द, षष्ठी विभक्ति बहुवचनम्।

3- काकः :- सर्वथा अयुक्तमेतत् यन्मयूर - हंस - कोकिल - चक्रवाक - शुक सारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्यास्य करालवक्त्रस्य - अभिषेकार्थं सर्वे सज्जाः। पूर्णं दिनं यावत् निद्रायमाणः एषः कथमस्मान् रक्षिष्यति। वस्तुतस्तु -

स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम्।
उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति।।

प्रकृतिमाता - भोः भोः प्राणिनः। यूयम् सर्वे एव मे सन्ततिः। कथं मिथः कलहं कुर्वन्ति। वस्तुतः सर्वे वन्य जीविनः अन्योन्याश्रितः।

प्र०-क - पूर्णं दिनं यावत् निद्रायमाणः कः कथमस्मान् रक्षिष्यति?

प्र०-ख - उलूकं नृपतिं कृत्वा का नु का भविष्यति।

प्र०-ग - के सर्वे एव मे सन्ततिः?

आदर्श उत्तर - (क) उलूकः रक्षिष्यन्ति।
(ख) उलूकं नृपतिं कृत्वा का नु सिद्धिः भविष्यति।
(ग) यूयम् सर्वे एव मे सन्ततिः।

GENIUS MIND
Date
Page

- इकाई -19 -

रिक्तस्थानानि पूर्तीं कुरुत ।

( भृशम् , यत्र , तत्र , अत्र , अपि , एव , सदा , वहिः , बलस्यार्द्धं , विद्या, अहिभुक )

1- इदानीं वायुमण्डलं ------ प्रदूषितमस्ति ।

2- ---- जीवनं दुर्वहम् अस्ति ।

3- प्राकृतिक वातावरणे क्षणं संचरणम् ----- लाभदायकं भवति ।

4- पर्यावरणस्य संरक्षणं ---- प्रकृतेः आराधना ।

5- ----- समयस्य सदुपयोगः करणीयः ।

6- भूकम्पित समये ----- गमनमेव उचितम् भवति ।

7- ------ हरितीमा ------ शुचि पर्यावरणम् ।

8- ------ व्यायामः कर्तव्यः ।

9- ------ बिना जीवनं नास्ति ।

10- मयूरः ----- इति नाम्नाऽपि ज्ञायते ।

आदर्श उत्तर – 1- भृशम्
2- अत्र
3- अपि
4- एव
5- सदा
6- वहिः
7- यत्र-तत्र
8- बलस्यार्द्धं
9- विद्या
10- अहिभुक

— इकाई -20-

स्वपाठ्यपुस्तकस्य सुभाषितानि पठित सुभाषितं शुद्धं श्लोक द्वयस्य लेखनम् करणीयाः ।

- इकाई -21-

कोपि एकंपत्रलेखनम् कुरुत ।

1- अवकाशार्थं प्राथनापत्रम्

2- मित्राय स्वाध्ययनस्य पत्रम्

3- पितरौ प्रति परीक्षायाः परिणामसूचकं पत्रम् ।

4- पुस्तकानि प्रेषयितुं प्रकाशकं प्रति पत्रम् ।

P-18

GENIUS MIND
Date
Page

- इकाई -२२ -

अधोलिखितम् अपठित गद्यांश सम्यक पठित्वा प्रश्नानाम् उत्तराणि लिखत

१- उत्साहः, उदासीनता, निराशा चेति त्रिस्त्रः अवस्था। शिशवः सदा उत्साह-शीलाः इति विदितमेव। युवानां अपि प्रायेण उत्साहशीलाः अनेके वृद्धा अपि तथैव। वयसः उत्साहस्य च नास्ति सम्बन्धः। उत्साहः मानवस्य सहज स्वभावः सः मनसः शरीरस्य च विकासाय भवति। शिशु उत्साहेन सर्वं गृहीतुम् सर्वं सह स्वादितुम् सर्वं सह खेलितुम् च प्रवर्तते।

प्रश्नाः - (१) शिशु उपहासे कृते किं करोति ?
(२) मनसः कति अवस्थाः सन्ति ?
(३) के-के उत्साहशीलाः भवन्ति ?
(४) युवानां पदे कः विभक्तिः अस्ति ?

आदर्श उत्तर -
(१) शिशु उत्साहेन सर्वं गृहीतुम्, स्वादितुम्, खेलितुम् च प्रवर्तते।
(२) मनसः तिस्त्रः अवस्थाः सन्ति।
(३) बालकः, युवानाः, वृद्धाः उत्साहशीलाः भवन्ति।
(४) षष्ठी विभक्ति, बहुवचन।

२- कस्मिंश्चित् प्रदेशे काचित् नदी प्रवहति। नदीतीरे कश्चन सन्यासी स्वशिष्यैः सह आश्रमं निर्माय वसति स्म। एकदा सन्यासी शिष्यैः सह नद्याः अपरं तीरम् गन्तुम् एकम् नौकां आरूढवान्। वेगेन प्रवहन्त्याम् नद्याम् अकस्मात् एका अपरा नौका शिलाया धट्टनेन निमग्नाः अभवत्। सन्यासी अकथयत् तस्यां नौकायां स्थितेषु कश्चिद् दुष्टः आसीत् इति मन्ये।

प्रश्नाः -
(१) सन्यासी कुत्र वसतिस्म ?
(२) अपरः नौका कस्याः धट्टनेन नद्याम् निमग्नः अभवत् ?
(३) सन्यासी नौका दुर्घटनायाः किम् कारणम् कथितवान् ?
(४) - नदी कुत्र प्रवहति ?

आदर्शउत्तरम् - (१) सन्यासी नदीतीरे वसति स्म।
(२) अपरः नौका शिलायाः धट्टनेन निमग्नाः अभवत्।
(३) सन्यासी दुर्घटनायाः कारणम् कथितवान् कश्चिद् दुष्टः आसीत् इति मन्ये।
(४) कस्मिंश्चिद् प्रदेशे नदी प्रवहति।

GENIUS MIND
Date
Page

3- जननी जन्मभूमि स्वर्गादपि गरीअसी। जन्मभूमि स्वर्गात् उत्कृष्टतरः अस्ति। वैदिक ऋषिः कथयति - माता भूमिः पुत्रोऽयं पृथिव्या। अतः अस्माभिः स्वार्थम् परित्यज्य देशस्य देशवासिना च सेवा सततं करणीया वयं राष्ट्रभावां, राष्ट्रीयचरित्रं, त्यागभावानाम्, विना राष्ट्रस्य संरक्षणम कर्तुं न पारयामः।

प्रश्नाः- (1) जन्मभूमिः कस्मात् गरीयसी ?
(2) माता भूमिः इति कः कथयति ?
(3) अस्माभिः पदेः का विभक्तिः अस्ति ?
(4) भूमिः इति शब्दस्य एकं पर्याय पदं लिखत ?

आदर्श उत्तर (1) जन्मभूमिः स्वर्गादपि गरीयसी।
(2) माता भूमिः वैदिक ऋषिः कथयति।
(3) अस्मद् शब्द, तृतीया विभक्ति, बहुवचनम्।
(4) भूमिः शब्दस्य पर्याय पदं वसुन्धरा अस्ति।

4- सतां सज्जनानाम्, सङ्गति संपर्कः संसर्गोवासन्गतिः इति कथ्यते। वस्तुतः सतसङ्गात् एव मानवः समुन्नतो भवति। सज्जनानाम् संसर्गेण जनः सज्जनः भवति। दुर्जनानां संसर्गेण दुर्जनः भवति। अतः सौसमुन्नति इच्छिता जनेन सर्वदा सतामेव संगतिर्विधेयः।

प्रश्नाः (1) अस्य गद्यांशस्य शीर्षकं लिखत्।
(2) केन जनाः सज्जनः भवति।
(3) दुर्जनः शब्दस्य विलोम शब्दः लिखत्।
(4) मानवः कस्मात् समुन्नतो अस्ति ?

आदर्श उत्तरम् (1) सत्संङ्गति
(2) संसर्गेण जनाः सज्जनः भवति।
(3) सज्जनः
(4) मानवः सतसङ्गात समुन्नतो भवति।

- इकाई -23-

अधोलिखित एकं विषयं आधारीकृत्य निबन्ध लेखनं कुरुत।
(1) महाकवि कालिदासः
(2) संस्कृत भाषायाः महत्वम्
(3) अस्माकं देशः
(4) अनुशासनम्
(5) पर्यावरणम्